CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.O.P.B

Coll. No. 237

Title Viṣṇuyāgaprayoga

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 237 Subject : Vedic Ritual.

Title : viṣṇuyāga prayoga.

Author : Ananta Deva. Scribe : Dinamaṇiśaṅkara

Date of the work : – Date of the Ms. : V.S. 1876

Place of the work : – Place of the Ms. : –

Size : 11.3" × 5.5" Extent : 31 leaves. 1 to 13 ...

Language : Sanskrit. Script : Devanāgarī

Remarks : Complete. Not possible to join with Ms. No. 236 No. 236.

॥श्रीगणेशाय नमः॥ अथ वैष्णवयागप्रयोग उच्यते॥ शुक्लैकादश्याः कस्यांश्चित्पूर्वं शुभदिने कृतनित्यक्रि
यः कर्ता पवित्रपाणिः॥ आचम्य प्राणानायम्य सत्वार्यो देशकालौ संकीर्त्य॥ ममोपात्तदुरितक्षयद्वारा॥
श्रीपरमेश्वरप्रीत्यर्थं पुरुषसूक्तेन जपपूजाहोमात्मकवैष्णवयागकर्तुं नरदधिकारसिध्यर्थं कृच्छ्रत्रयप्रा
यश्चित्तं चरिष्ये इति संकल्प्य॥ उक्तवपनादिविधिना कृच्छ्रत्रयमाचरेत्॥ तत्प्रत्याम्नायत्वेन गोदा
नत्रयं वा तन्निष्क्रयं वा दद्यात्॥ ततः शक्तश्चेदुपवासान शक्तश्चेत् एकभक्तं वा कुर्यात्॥ तत एकाद
श्यां गणपतिं संपूज्य देशकालकीर्तनांते सूर्यमंडलांतर्वर्त्तिश्रीनारायणप्रीत्यर्थं पुरुषसूक्तायु
तजपं मासं फलाहारः सन् ततः परतश्चाचरिष्ये इति संकल्प्य॥ तत्फलसमृद्ध्यै श्रीविष्णुसहस्रना
म्नासहस्रजपं च तथैवाचरिष्ये इति संकल्प्य॥ जापकान् वृणुयात्॥ यथासंभवं पूजयेच्च॥ मासं
त्रिषवणं शक्तः स्नायात्॥ स्नानकाले षोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः॥ श्रीजगद्बीजपु
रुषो नारायणो देवता॥ अनुष्टुप् छंदः॥ अंत्या त्रिष्टुप् स्नाने विनि॰ इति ऋष्यादिस्मरणपूर्वकं षो
डशभिर्मार्जनं मघमर्षणं च कृत्वा संध्योपासनांते आदित्यमंडले नारायणं ध्यायन् पुरुषसू
क्तेनादित्यमुपतिष्ठेत॥ ततो भगवत्पूजार्थं प्राङ्मुखः शुद्धमानसः कुशासने उपविश्य करि
ष्यमाणपूजाजपांगत्वेन संकल्पपूर्वकं न्यासं कुर्यात्॥ ॐ सहस्रशीर्षा॰ गुलं। वामकरे न्यसेत्॥
पुरुष एवेदं॰ इति। दक्षिणकरे न्यसेत्॥ एतावा॰ दिवि। वामपादे॥ त्रिपादू॰ अभि। दक्षिणपादे न्यसेत्॥
तस्माद्विराल॰॥ वामजानौ॥ यत्पुरुषेण॰ दक्षिणजानौ॥ तं यज्ञं॰ वामकटिदेशे॥ तस्माद्यज्ञात्स॰ संभृतं॰

।२४।

दक्षिणकटिदेशे॥ तस्माद्य॰ ऋचः सा॰ नाभौ॥ तस्मादश्वा॰ हृदये॥ यत्पुरुषं॰ कंठे॥ ब्राह्मणो
स्य॰ वामबाहौ॥ चंद्रमा मन॰ दक्षिणबाहौ॥ नाभ्या आसी॰ मुखे॥ सप्तास्यासन्॰ अक्ष्णोः॥ यज्ञे
न य॰ मूर्ध्नि॥ ॥ततः पंचांगन्यासं कुर्यात्॥ ब्राह्मणोस्य॰ हृदयाय नमः॥ चंद्रमा शिरसे स्वाहा॥
नाभ्या आसी॰ कवचाय हुं॥ शिखायै वषट्॥ सप्तास्यासन्॰ कवचाय हुं॥ यज्ञेन यज्ञ॰ अस्त्रा
य फट्॥ यथा देहे तथा देवे एवं पुरुषसूक्तेन देवे न्यासं कृत्वा॥ इत्थमेवं मौ सद्यं संपूज्य मूर्तौ न्या
कृ कृत्वा स्वात्मनि गंधाद्यैकदेशेन भगवत्पूजां कृत्वा भगवदासनपीठपूजां च कुर्यात्॥ तद्यथा॥ स्व
भगवदासनकर्णिकायां॥ आधाराय नमः॥ प्रकृत्यै॰॥ कूर्माय॰॥ अनंताय॰॥ पृथिव्यै॰॥ क्षीर
निधये॰॥ श्वेतद्वीपाय॰॥ रत्नोज्ज्वलितमंडपाय॰॥ कल्पवृक्षाय॰॥ स्वर्णवेदिकायै॰॥ अथास
नपादेषु॥ आग्नेये धर्माय॰॥ नैर्ऋत्ये ज्ञानाय॰॥ वायव्ये वैराग्याय॰॥ ईशाने ऐश्वर्याय॰॥ ॥
पूर्वे अथ गात्रेषु॥ अग्नित्वधर्माय॰॥ दक्षिणतः अज्ञानाय॰॥ पश्चिमे अवैराग्याय॰॥ उत्तरे अनैश्वर्याय॰॥ पुनः
कर्णिकायां॥ अनंताय॰॥ पद्माय॰॥ आनंदकंदाय॰॥ संविन्नालाय॰॥ प्रकृतिमयकेसरेभ्यो॰॥ विकारम
यकेसरेभ्यो॰॥ पंचाशद्वर्णकर्णिकायै॰॥ अं द्वादशकलात्मने सूर्यमंडलाय॰ उं षोडशकलात्मकसोम
मंडलाय॰॥ मं दशकलात्मकवह्निमंडलाय॰॥ सं सत्वाय॰॥ रं रजसे॰॥ तं तमसे॰॥ आं आत्मने॰॥ अं अं

ता ज्ञा पद्मे

नरात्मने ॥ ॐ ह्रीं ज्ञानात्मने नमः इति कर्णिकायां ॥ अथ पूर्वादिपत्रेषु ॥ विमलायै० ॥ उत्कर्षिण्यै० ॥ ज्ञानायै०
क्रियायै० ॥ योगायै० ॥ प्रह्व्यै० ॥ सत्यायै० ॥ ईशानायै० ॥ कर्णिकायां ॥ अनुग्रहायै० ॥ ॐ नमो भगव
ते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वयोगयोगपीठात्मने नमः इति कर्णिकायां पुष्पांजलिं दत्वा ॥
सत्यज्ञानानंदस्वरूपं परं धामैव मकलं पीठमिति चिंतयेत् ॥ इति पीठपूजा ॥ अथ तत्र स्थापित प्रतिमा
यां पूर्वप्रतिष्ठितायां ॥ आवाहनं कार्यं ॥ नूतनायां वा लतास्युच्चारणायां ॥ ॐ सहस्रशीर्षा० पुरुषः ॥ ॥
ॐ श्रीजगदीशपुरुषोत्तम मा वाहयामि ॥ तदस्त्विति निष्टद्य वे प्रतिष्ठा इति प्रतिष्ठाप्य ॥ ध्यानं ॥ ध्येयः
सदा सवितृमंडलमध्यवर्ती इति ध्यानं कृत्वा ॥ पुष्पांजलिं दत्वा ॥ मूर्तिं प्रक्षाल्य चंदनपुष्पादि ॥१५॥
कृत्वा ॥ सहस्रशीर्षेति षोडशनारायण जगदीशः पौरुषमानुष्टुभं त्रिष्टुबंतं ॥ षोडशोपचार ॥२
पूजने विनियोगः ॥ सहस्रशीर्षेत्यावाहनं पूर्वमुक्तं ॥ आसनं देयं ॥ ॐ पुरुष एवेदं० इति रोहति ॥
श्रीसूर्यमंडलांतर्वर्त्ती जगदीशपुरुषोत्तमाय० आसनं समर्पयामि ॥ ततः पाद्यपात्रे शुद्धोदकं नि
षिंच्य ॥ गंधपुष्पाक्षतश्यामाकदूर्वा० विष्णुक्रांता तुलसीदलानि प्रक्षिप्य पाद्यं पादयोर्दद्या
त् ॥ एतावानस्य० दिवि ॥ श्रीसूर्य० जगदीशपुरुषोत्तमाय पाद्यं स० ॥ त्रिपादूर्ध्वं० अर्घ्यं ॥ गंधादियु
क्तं जलं यवकुशाग्रतिलसर्षपदूर्वातुलसीदलफलानि प्रक्षिप्य अर्घ्यं दक्षिणहस्ते दद्यात् ॥ तस्मा

निगंधा

द्विराडजा० पुरः ॥ श्रीसूर्यमं० जगदीशपुरुषोत्तमाय० आचमनं स० ॥ आचमनीयेन जातीफलकं
कोललवंगादियुक्तेन जलेन प्रक्षिप्य दक्षिणहस्ते आचमनं दद्यात् ॥ अथ पंचामृतेन स्नानं ॥ तन्मंत्रैः
॥ आप्यायस्वेति पयसा स्नानं ॥ दधिक्राव्णो अकारिषमिति दधिस्नानं ॥ घृतवतीति घृतस्नानं ॥
मधुवातेति मधु ॥ स्वादुः पवस्वेति शर्करा ॥ प्रत्येकं शुद्धोदकं ॥ चंदनादि पंचोपचारान्कृत्वा ॥ भूर्भु
वः स्वः स्नानं समर्प्य ॥ एवं प्रत्येकं पंचामृतेन च अभिषिंच्य ॥ पुरुषसूक्तेन च ॥ अतो देवा विष्णोर्नुकं स
वांकर्मणा परीमा त्रयासहस्रशीर्ष विष्णुर्योनिं नेज मेष नमो ब्रह्मणे ॥ अन्यलिंगमंत्रैरभिषिंच्य
हिरण्यवर्णामिति च लक्ष्मीसूक्तेन चाभिषिंच्य ॥ यत्पुरुषेण हविषेति पुरुषसूक्तेन च शुद्धोदकेन स्ना
पयेत् ॥ स्नानांते आचमनं ॥ तस्माद्विराळेति ॥ तद्विष्णोरिति आभरणानि ॥ तस्माद्विराळित्याचमनं
॥ तं यज्ञं बर्हिषीति वस्त्रं ॥ तस्माद्विरा० आचमनं ॥ तस्माद्यज्ञात्सर्वहुतः संभृतं० यंपे ॥ इत्युपवीतं ॥
उपवीतांते तस्माद्विरा० आचमनं ॥ तस्माद्यज्ञा० ऋचः सा० यत ॥ इति चंदनं ॥ तस्मादश्वा अ० वयः ॥ इति
पुष्पं ॥ देवस्य परितः परिवारदेवताभ्यः पुष्पाणि समर्प्य ॥ विष्णुनाममंत्रैः अबीलगुलालसिंदूरसु
गंधतैलपुष्पाक्षतैः संपूज्य ॥ यत्पुरुषं व्यदधुरिति धूपं स० ॥ ब्राह्मणोस्येति दीपं स० ॥ चंद्रमा मनसो
जात इति नैवेद्यं स० ॥ नैवेद्यांते आचमनं तस्माद्विराळेति ॥ तद्विष्णोरित्या हृत्याफलतांबूलं दत्वा ॥ नमो

श्र

नमो ब्रह्मणे० इति नीराजनं कृत्वा ॥ नाभ्या आसीदिति साष्टांगं नमस्कृत्य ॥ सप्तास्यासन्परिधय
स्त्रिः सप्तेति प्रदक्षिणा चतुष्टयं कृत्वा ॥ यज्ञेन यज्ञेति यथाशक्ति दक्षिणां समर्प्य ॥ पुनः प्रदक्षिणाः
कुर्यात् नमस्कारश्च ॥ नमो ब्रह्मणेति पुष्पांजलिं दत्वा ॥ पुरुषसूक्तेन जितं तेति स्तुतिं कृत्वा ॥ ततः
प्राणानायम्य जपं संकल्प्य ॥ ऋष्यादिस्मरणं पंचांगन्यासं च कृत्वा ॥ प्रणवादिसूक्तावृत्तिरूपं
जपं यथाशक्ति कृत्वा नत्सांगनाये विष्णुर्नः स्मृत्वा ॥ पूजा जपो भगवते समर्प्य ॥ गुह्यातिगुह्यगोप्तृ १६
त्वं गृहाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्सुरेश्वर ॥ इति मंत्रेण जपं समर्प्य ॥ देवस्य द
क्षिणे स्थंडिलादिकं प्राङ्मुख उपविश्य होमं संकल्प्य ऋष्यादिस्मरणं पूर्ववत् न्यासद्वयं कृ ३
त्वा स्वगृह्योक्तपरिमाणं स्थंडिलं सहस्रशीर्षेति मंत्रेण कृत्वा । उपलेपनोल्लेखनैरिति ॥ पुरु
ष एवेदमिति प्रोक्ष्य ॥ एतावानस्येत्यग्निं प्रतिष्ठाप्य ॥ त्रिपादूर्ध्वमिति समित्प्रक्षेपेण समिध्य
॥ स्वगृह्योक्तविधिनाग्नौ चरुस्थापनांतं कृत्वा निष्टप्तमाज्यं तस्माद्विराळित्याज्यभागावधि श्रि
त्य ॥ तस्माद्विराळित्यस्मावधि । श्रित्यनेनैव पयसि चरुं श्रपयेत् ॥ ततो दर्विसादनांते ॥ य देवेशं क्रा
पुरुषेणेति अग्निमध्ये पद्मासनं कल्प्य [illegible]त्वा ॥ तेनैव दत्वा पुष्पांजलिं ॥ चिंतयेद्देवं [illegible]
तानंतसमप्रभं ॥ विष्णुनास्यं वा दृशी[illegible]कास्यं रक्तलोचनमिति ध्यात्वा अग्नौ भगवत्पूजी

२ रु इ

कारिष्ये इति भगवत्प्रार्थनां कृत्वा ॥ ब्राह्मणैः कुरुष्वेति दत्तानुज्ञो भगवदाज्ञां चिंतयित्वा ॥ तं यज्ञमिति
गंधं ॥ तस्माद्य० संभृतं ॥ पुष्पाणि ॥ तस्माद्य० ऋचः सा० धूपं ॥ तस्मादश्वा दीपं ॥ यत्पुरुषं व्यदधुः ॥ नैवे
द्यं ॥ तद्विष्णोरित्यास्त्वा आचमनं ॥ तांबूलं दत्वा ॥ होमं करिष्ये ॥ इत्यनुज्ञां प्रार्थ्य ॥ पूर्ववत्तां प्रार्थ्य ॥
इध्महवनाद्याज्यभागांते कृते ॥ तं यज्ञमिति दश स्रिरभिघारिता दशाश्वत्थीः समिधो जुहुयात् ॥ जग
द्बीजाय पुरुषोत्तमायेदमिति त्यागः ॥ ताभिरेव दशाज्याहुतीर्जुहुयात् ॥ तथा चरोराहुतीः ॥ उभयत्र
त्यागः ॥ पूर्ववत्ततोग्निं पर्युक्ष्य क्षमापयेत् ॥ अपराधसह० परमेश्वरेति ॥ ततः स्वगृह्योक्तविधिना स्वि
ष्टकृदादिहोमशेषं समाप्य ॥ स्तोत्रं करिष्ये इत्यनुज्ञां प्रार्थ्य पूर्ववत्तां प्राप्य अग्निव्यवधायकं बर्हिरादाप ॥८॥
सार्य तत्समीपे प्राङ्मुख उपविश्य ॥ अग्निस्थं भगवंतं ध्यात्वा ॥ स्तोत्रं पठेत् ॥ जितं त इति स्तोत्रांते प्रदक्षि ॥९॥
णा नमस्कारान्कृत्वा ॥ ललाटोपरि मुकुलमुद्रां बध्वा ॥ पुरुषसूक्तं यथाशक्ति जपित्वा ॥ देवे नि
वेद्य ॥ भगवन्देवदेवेश पुरुषोसि सनातन ॥ त्वमस्य पुंडरीकाक्ष भक्तस्य तु विशेषतः ॥ ज्ञानादज्ञान
तो वापि यन्न्यूनादि कृतं मया ॥ तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादाज्जनार्दन ॥ इत्यनेन संप्रार्थ्य सूर्यमं
डलस्थमग्निस्थं शंखचक्रादिधारिणं विष्णुं ध्यात्वा षोडशपुष्पाण्यूर्ध्वं सूर्यमुद्दिश्योत्क्षिप्य जितं त इ
ति मंत्रेण तावंत्येव पुष्पाणि स्वमूर्ध्नि निःक्षिप्य विसर्जने जितं त इति मंत्रेण कृत्वा ॥ यं देवग
णा इति संप्रार्थ्य ब्राह्मणान्भोजयेत् ॥ स्वयं फलानि भुंक्त्वा ॥ पी स्वपेत ।

दक्षिणकटिप्रदेशे॥ तस्माद्यं० ऋचः सा० नाभौ॥ तस्मादश्वा० हृदये॥ य

स्वंकरिष्ये इति संकल्प्य॥ तदंगत्वेन स्वस्तिपुण्याहवाचनं। मातृकापूजनं नां
दीश्राद्धमाचार्यादिवरणं च करिष्ये॥ तदादौ गणपतिपूजनं करिष्ये इति संकल्प
येत्॥ केवलं होमपक्षे तु संकल्पदिनात्पूर्वमेव कस्मिंश्चिद्दिने करिष्यमाणवि
ष्णुयागाधिकारसिद्ध्यर्थं दिनत्रयमुपवासत्रयं चकल्प्य पूर्वकं कृत्वा॥ एकाद
श्यां प्रीतिकाम इत्यंते विष्णुसहस्रनामकरणकशतसंख्यहोमसहितं पुरु
षसूक्तकरणसहस्रसंख्यहोमसंग्रहमहं करिष्ये इति सं॥ कल्पे विशेषः स
हस्रनामहोमाभावपक्षे तत्संकीर्तनाभावः॥ ततः स्वशाखीयप्रकारेण नांदीश्रा ॥२८॥
द्धं कुर्यात्॥ कात्यायनानुसारिणी वसोर्धारापूजनमधिकं॥ ततः॥ आचार्यादिव
रणं॥ एतत्प्रवरान्वितगोत्रेत्यन्नं हतद्वेतांतर्गतं तच्छाखाध्यायिनमेतन्नामानं
त्वामभिवस्त्रादिभिराचार्यत्वेन वृणे॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्प
तिः॥ तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रतेति॥ एवं ब्रह्मादिवरणमं
त्रे विशेषः॥ यथा चतुर्मुखो ब्रह्मा स्वर्गलोके पितामहः॥ तथा त्वं मम यज्ञेस्मिन्ब्रह्मा
भव द्विजोत्तमेति॥ ऋत्विग्वरणमंत्रः॥ ९ यस्य यागस्य निष्पत्त्यै भवंतोभ्यर्थि

अनेन देवं दिन विधिना मासमनिवाद्य हयनन्मासेन पुरुषसूक्तादयुतं जपः॥
प्रौक्षीयात्॥ ततो भगवत्स्नानादिनमतिवाह्य निशायां नित्यकर्मं ति ब्रह्मचार्यधः
४ ॥ ३ ॥ सहस्रनाम्ना सहस्रं जपं च समाप्य अनंतरमुक्तेकादशस्थापुरुष
सूक्तायुतं जपं॥ सहस्रनाम्ना॥ ततः स्नानादिनित्यक्रियः शुचौ देशे षोडशहस्तं
चतुर्द्वारं हारेभ्यो बहिः हस्तमात्रावधि निर्मितशंखादी चिह्नितं तत्तोरणं मयः
वेदिकायुक्तं तद्दक्षिणतोरणे आमाः कार्यमित्युपक्रमस्य रामवाजपेयि
नातसाधकत्वेन वास्तुशास्त्रेण हरणात् [illegible] होमार्थं कुंडं भुजो ऽष्टा च चारि
शदंगुलमितः॥ अयुतहोमार्थं लिंगाहृय [illegible] चतुष्ट्यं सप्तयवाधिकत्र्य
स्त्रिंशदंगुलमितः॥ सहस्रहोमे चतुर्विंशत्यंगुलामितः॥ कुंडमंडपविषयेक
ल्पचविस्तरेण स्मृत्ततस्मृतिकौस्तुभे माचक्रलत्पदीधितौ द्रष्टव्यं॥ अथ ल
ब्धवाह्मणानुज्ञः सपत्निकोय॥ मानश्चाचांतो देशकालौ संकीर्त्य॥ मम मंड
नवीर्ति श्रीनारायणप्रीतिकामः॥ कारितस्य पदशाशसंख्यया विष्णुसहस्रनाम
करणकहोमसिद्ध्यर्थं पुरु[illegible]करणकहोमात्मकं देवस्तवयाग सहेयेम

तामहा॥ सप्रसन्नो प्रकर्तर्थमाहिर्ज्यौतिर्विधिपूर्वकमिति॥ शाक्तः सर्वानाचार्य
मेववामधुपर्केणार्हयेत्॥ ततो मंडपपाश्चिमदेशोपविश्य गंधपुष्पफलपु
ष्पवयुक्तं॥ ताम्रपात्रमादाय उदङ्मुखः कृतांजलिरर्घ्यं दद्यात्॥ ॐ आगच्छ स
र्वकल्याणि वसुदे लोकधारिणि॥ उद्धृतासि वराहेण सशैलवनकानना॥१॥
मंडपं कारयिष्यामि [illegible] शुभलक्षणं॥ गृहाणार्घ्यं मयादत्तं प्रसन्ना वरदा भवेति॥
बद्धांजलिः स्योना पृथिवीति प्रार्थयेत्॥ ततः सपत्निको यजमानः [illegible] कलशहस्तमा य
दाय आचार्याभिः दिसह ऋभिरंकणैर्भिरिति मंडपं गत्वा मंगलवाद्यघोषेण मंड
पं प्रदक्षिणी कृत्याः पश्चिमद्वारेणाविशेत् तंत मंडपे पश्चिमदेशोपवि ६ तो ५
श्यैव स्तवयागांगत्वेन मंडले देवताप्रतिष्ठापनं करिष्ये इति संकल्पयेत
॥ तत आचार्योयद्वसुसंक्लितं भूतमिति मंडपदिक्षु प्रादक्षिण्येन सर्षपान्वि
कीर्य शुचीवाद्यति पंचगव्येन कुशैः प्रोक्ष्य॥ आपोहिष्ठेति ऋचेना
द्भिः प्रो[illegible] क्षतनांजलीः॥ स्वस्त्ययनं तार्क्ष्यमित्यचोपठित्वा वेद्यामष्ट द

०नं वा विरच्य॥ प्राच्यां सुहननामकमचलं तोरणं निदध्यात्॥ ॐ अग्निमीळे इति मं
त्रेण ऋग्वेदचिह्नितं अचलं सुहननामकं तोरणं पूर्वं निधाय ततः सुहनतोरणाय
इति गंधादिपंचोपचारैः पूजयेत्॥ तत्र राहुबृहस्पती न्यस्य — — गंधादिना सं
पूज्य॥ ॐ भिद्रीयोरित्यादि कलशस्थापनं विधि पूर्णादिवशति पूर्णःपाञ्चानि धा
नांतं कलशस्थापनं कृत्वा॥ तस्मिन् कुमावमावाहयामीति कृत्वाऽक्षतं पूजनपूर्वकं कृत्वा
यनम इति मंत्रेण षोडशभिः पंचभिर्वोपचारैः पूजयेत्॥ ततः इषे त्वोर्जे इति मंत्रोप ॥१६॥
चक्रचिह्नितमौदुंबरसुभद्रनामतोरणं दक्षिणे निधाय सुभद्रतोरणाय नम इ
ति संपूज्य॥ सूर्यांगारकौ हस्त्यसं स्थाप्य कलशस्थापनांते तत्र धरमावाह्य धाराय नम इ
ति पूजयेत्॥ ततः अग्न आयाहीति मंत्रेण गदाचिह्नितं प्रदत्तं सुकर्मं तोरणं पश्चि
मे निधाय॥ सुकर्मतोरणाय नम इति संपूज्य॥ शुक्रबुधभौमस्य संपूज्य कल
शस्थापनांते वाक्पतिमावाह्य वाक्पतये नम इति पूजयेत्॥ ततः शन्नो देवीरभिष्टय
यज्ञमिमं त्रेण पद्मचिह्नितं वटं सुहोत्रनामकं तोरणमुत्तरे निधाय सुहोत्र

तोरणाय नम इति संपूज्य॥ तत्र सोमकेतु शनिराहुस्य संपूज्य कलशस्थापनांते विघ्ने
शमावाह्य विघ्नेशाय नम इति पूजयेत्॥ ततः पूर्वद्वारे मही द्यौरित्यादि मंत्रावृ
त्या कलशं संस्थाप्य तत्र ऐरावतगजमावाह्य पूज्य ऋग्वेदः पद्मपत्राक्षो गायत्रः
सोमदैवतः अत्रिगोत्रस्तु विप्रेन्द्र लिकर्षं मम रवेभव इत्यावृत्त्या ह्वानं ऋग्वेद
नौ पूर्वद्वारे शांतीपागर्ययेत्वा अग्निमीळे इति प्रत्येकं गंधादीना संपूज्यात तत्र क
लशाहये एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरोऽमरेश संविश्य मात्रोऽस्म
८ रसांगणेन मम माध्वरं पाहि नमो नमस्ते भोइंद्र इहागच्छ इह तिष्ठ इंद्र सांगं सप
५श्री रिवारं सायुधं सशक्तिकं आवाहयामीत्यावाह्य त्रातारमिति संपूज्य॥ अग्नेः
शिशान इति मंत्रेण पंचरत्नं दंडे पीतपताका सहितं पीतध्वजमुद्धित्य एवं वत्
स्त पीतालंकार वरोत्पलं वितद्विहस्तसहस्राक्षं ध्यात्वा इंद्र सुरपतिः श्रेष्ठो वज्रह
स्तो महाबलः शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः इति प्रणम्य इंद्राय सांगाय

॥ सपरिवाराय सायुधाय सशक्तिकाय एतं माषभक्तबलिं समर्पयामि इति माषभक्त
बलीं दद्यात् ततः आचमनं एवमाग्नेयादिकलशस्थापनं घाचमनांतं तत्र विदिक्षे
कः कलशो दिक्षु द्वौ आग्नेयकलशे पुंडरीकाक्षौ दिग्गजौ संपूज्यौ एह्येहि सर्वामरइ
यवाइमुनिप्रवीरैरभितोभितुष्टः तेजोवता लोकगणेन सार्द्धं ममाध्वरं पाहि कवे नमस्ते
भो अग्ने इहागच्छ इह तिष्ठेत्यादि आवाह्य त्वं नाग्न इति संपूज्य अग्निं हुतमिति मं
आत्राभ्यां पंचहस्तदंडं रक्तपाताका सहितं रक्तध्वजं समुच्छित्य छागगः शक्तिकमंड २०
लांकितहस्तकं रक्तालंकारमग्निं ध्यात्वा आग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः
धूमकेतुरजोध्यक्षः तस्मै नित्यं नमो नमः इति नत्वा अग्नये सांगाय मिति बलिं
दत्वा आचम्य दक्षिणद्वारे प्रतिशारवं पूर्ववत्स्थापितकलशद्वये वामनं गज
माबाह्य संपूज्य कातराक्षो यजुर्वेदस्त्रैष्टुमो विष्णुदैवतः काश्यपेयस्त विप्रेंद्र
क्षतिकर्वं ममरक्षमव इत्याद्यत्याद्यो यजुर्वेदीनो दक्षिणद्वारे शांतिपागर्थे दत्वा

ऽरिषेत्वोर्जेति प्रत्येकं गंधादिना संपूज्य ॥ तत्र कलशद्वये ॥ एह्येहि वैवस्वत ध
र्मराज सर्वामरैरर्चित धर्ममूर्त्ते ॥ शुभाशुभानंदशुचामधीश शिवाय नः पाहि मखं न
मस्ते ॥ भो यमेत्यादि आवाह्य यमाय सोममिति संपूज्य ॥ आयं गौरिति पंचहस्
स्तदंडं रक्तपाताकायुतं रक्तध्वजं समुच्छित्य महिषस्थं दंडपाशांकित हस्तकं रक्ता
लंकारं रक्तांजनवयोपमं ध्यात्वा महामहिषारूढं दंडहस्तं महाबलम् ॥ आवाह
यामि यज्ञेस्मिन्पूजेयं प्रतिगृह्यतामिति नत्वा यमाय सांगायेति बलिं दत्वा
आचम्य आग्नेयस्थ ॥ नैर्ऋते स्थापितकलशे कुमुदकुर्नयं योगजावाह्य संपू
ज्य ॥ एह्येहि रक्षोगणनायकस्त्वं विरमलवेतालपिशाचसंघैः ममाध्वरं पाहि
पिशाचनाथ लोकेश्वरस्त्वं भगवन्नमस्ते ॥ भो निर्ऋतेत्यादि आवाह्य रक्षस्वंतमिति
संपूज्य मोषु ण मिति पंचहस्तदंडं नीलपताकायुतं नीलध्वजं समुच्छित्य ॥ नरा
रूढं खड्गहस्तं नीलालंकारं बहुराक्षसवेष्टितं निर्ऋतिं ध्यात्वा ॥ निर्ऋति खड्गहस्तं च

सर्वलोकैकपालने॥ आवाहयामि यज्ञेस्मिन् पूजेयं प्रतिगृह्यतामिति नत्वा। निर्ऋ
निर्ऋतये सांगाय नमः इति बलिं दद्यात्॥ आचम्य पश्चिमद्वारे सर्वत्र विहितकलश
द्वये अंजनाख्यं दिग्गजेन्द्रस्य संपूज्य॥ सामवेदस्तु पिंगाक्षो जगतः सर्वदैवतः॥ भ
भरद्वाजस्तु विप्रेंद्र ऋत्विक्त्वं मे मखे भव॥ इत्यावृत्या द्वौ सामगदिनौ [illegible] पश्चि
मद्वारे शांतिपाठार्थं रुचा ॐ अग्न आयाहीति प्रत्येकं गंधादिना संपूज्य तत्र कल
शद्वये एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः विद्याध २१
रेंद्रामरगीयमानपाहि त्वमस्मान् भगवन्नमस्ते भो वरुणेत्यादि आवाह
तत्वायामीति संपूज्य — इतमिति पंचहस्तं दंडं श्वेतपताकं श्वेतध्वजं स
मुच्छ्रित्य यकरस्थं पाशहस्तं श्वेताभं कारंबेतवर्णं वरुणं ध्यात्वा पाशहस्तं व
वरुणं मर्णसांपतिमीश्वरं आवाहयामि यज्ञेस्मिन् वरुणायनमो नमः
इति नत्वा वरुणाय नमः इति बलिं दत्वा आचम्य वायव्ये निहितकलशेपु

ष्पदंतसिद्धार्थौ गजौ न्यस्य संपूज्य॥ एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढ सह
सिद्धसंघैः॥ प्राणाधिपः कालकपे सहाय गृहाण पूजां भगवन्नमस्ते॥ भो वायवेन्याय वाह
इति ववायव स्पृत इति संपूज्य॥ वायवायाहीति पंचहस्तं दंडं धूम्रपताकं धूम्रध्वजं समु
च्छ्रित्य मृगाधिरूढं धूम्रवर्णं चित्रांबरं युवानं वायुं ध्यात्वा॥ वायुमाकाशगं चैव
वधवनं वेगपद्धतिं॥ आवाहयामि यज्ञेस्मिन् वायवौ इंन मापिवेति नत्वा। वायवे
सांगाय नमः इति बलि भरत्वा॥ आचम्य॥ उत्तरे सर्वत्र विनिहितकलशद्वये॥ स
र्वभौमं दिग्गजन्यस्य संपूज्य बहन्नेत्रो थर्ववेदो ऽनुष्टुभो रुद्रदैवतः॥ वैशंपाय
नस्तु विप्रेंद्र ऋत्विक्त्वं मम मखे भव॥ इत्यावृत्या द्वावथर्ववेदिनो वृत्वा॥ ॐ शन्नो
देवीति गंधादिना संपूज्य॥ एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणे
न सार्द्धं॥ सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते॥ भो सोमेत्या
दि आवाह्य सोमो धेनुमिति संपूज्य॥ आप्यायस्व समेतु तेति पंचहस्तं दंडं हरित
पताकं हरितध्वजं समुच्छ्रित्य नरयुतविमानस्थं हारकेयूरालंकृतं पद्मगदांप्रेत द्विक

रत्नमुकुटिनं महोदरं महाकायं कुबेरं मो राजाय यक्षपतिः ॥ तस्मै सोमाय दे
वाय नक्षत्रपतये नमो इति ॥ नत्वा ॥ सोमाय ॥ मिति बलिं दत्वा ॥ आचम्य ॥ ऐशा
न्यां निधिकलशो सुप्रतीकमंगलो गजोन्यस्य संमुखा ॥ एह्येहि विश्वेश्वरन ॥
स्त्रिशूलकपालखट्वांगधरेण सार्द्धं ॥ लोकेन यज्ञेश्वर यज्ञसिद्धौ गृहा
ण पूजां भगवन्नमस्ते ॥ मो ईशानेत्यादिना आवाह्य ॥ इतिमीशानमिति सं
पूज्य ॥ अभिवादयसवितरिर्षति पंचहस्त स्त्रैश्वेतापताकं श्वेतध्वजं
समुच्छ्रित्य वृषारूढं वरंभिवादेव सवीनरि प ते पंचहस्तैव णमीशानं
ध्यात्वा ॥ वर्षस्कंधि समारूढं शूलहस्तं त्रिलोचनं ॥ आवाहयामि यज्ञे स्मि
न् पूजेयं प्रतिगृह्यतां ॥ सर्वाधिपो महादेवो ईशान मुक्ते ईश्वरः ॥ शूल
पाणिर्विरूपाक्षः तस्मै नित्यं नमो नमः इति नत्वा ईशानाय सांगाय
त्यादि बलिं दत्वा आचम्य ईशान पूर्वयोर्मध्ये ऊर्ध्वादि ॥ कलमनंतमेघे
हिपातालधरामरेंद्रयागनाकिन्नरगीयमान रत्नोग्रगतो अमरलोक

संधैरनंतरक्षाधरमस्मरीयं॥ ओं अनंत इहागच्छ इत्यादिनावाह्य॥ प्रायं गोरितीसं०
तेनैव मंत्रेण पंचहस्तरंडं मेघवर्णपताकं श्वेतध्वजं समुच्छ्रित्य नीलवर्णशिय नासीनफ
णासप्तक मंडितं पद्मशीखयुतोर्ध्वधोदक्षिणद्विकरं॥ चक्रगदायुतोर्ध्वधोवाम मद्विकर
मनंतं ध्यात्वा॥ योसावनंतरूपेण ब्रह्मांडं सचराचरं॥ पुष्पवद्धारयेत मूर्ध्नि तस्मै नित्यं नमो
नमः॥ इति नत्वा॥ अनंताय सांगाय इत्यादिना बलिं दत्वा॥ आचम्य पनैर्ऋत पश्चिम मध्ये स्था
पित कलशे कर्द्धिकाति॥ ब्रह्माणी॥ एह्येहि सर्वाधिपते सौरेंऽजलोके नसार्द्धं पितृदे प२३॥
वताभिः॥ सर्वस्य धाता स्वपितप्रभावो विश्वाभवनं सततं शिवाय॥ ब्रह्मन्निहागच्छेत्या
दिनावाह्य॥ ब्रह्मजज्ञानमिति ~~[illegible]~~॥ संपूज्य॥ तेनैव मंत्रेण पंचहस्तरंडं रक्तप
ताकं रक्तध्वजं समुच्छ्रित्य अक्षसूत्र [illegible] पुस्तियुतोर्ध्वधोदक्षिणकरं कमंड
लुयुतोर्ध्वधोवामद्विकरं चतुर्मुखं हंसारूढं जटिलं लंबोदरं ब्रह्माणं ध्यात्वा॥ पद्म
योनिश्चतुर्मूर्ति वेदावासः पितामहः॥ यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै नित्यं नमोनमः
॥ इति नत्वा॥ ब्रह्मणे सांगायेति बलिं दत्वा॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥

॥श्री॥ आचम्य प्राणानायम्य॥ मंडपमध्ये निखिलवर्णमिश्रपुच्छरंडं दशहस्तदीर्घं त्रिहस्तवि
स्तृतं मण्डपध्वजमिंद्रदिक्कोणे स्तंभे निर्मितेन समुच्छ्रित्य ततः अक्षता निष्य॥ पुष्पेषु पक्षोन्मी मंधादिना
नमः॥ इति संपूज्य मंडपपूर्वस्य प्रदेशमुपलिप्य॥ तत्र तंदुलपुंजादौ देवता आवाह्य पूजये
त्॥ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च॥ ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वंतु तानि मे॥
देवदानवगंधर्वा यक्षराक्षसपन्नगाः॥ ऋषयो मुनयो गावो देवमातर एव च॥ सर्वे ममाध्वरे
रक्षां कुर्वंतु मुदान्विताः॥ ब्रह्मा विष्णुश्च रुद्रश्च स्कंदो व्रजपालगणैः सह॥ रक्षंतु मंडपं सर्वे निर्विघ्नं ॥२४॥
रक्षांसि सर्वतः॥ इति मंत्रेण न्यस्तद्रव्यं स्व्यधिमं जोक्तान्तः स्थावरचरभूतादि देवतान्यः प्रमाष १८
नक्तबलिं समर्प्य इति बलिं दत्वा॥ ततो अक्षताक्षितपाणिर्बद्धांजलिः आचार्यो यजमानः
पूर्वद्वारेण मंडपं प्रविश्य वेदिपश्चिमे उपविशेत्॥ यजमानोऽन्यत्र देशे आचार्यं प्राणानायम्य
॥ कृतअद्यश्रावणमासे मीपक्षे तत्तद्दिने हृद्य स्थितरमानो निमितानारायणप्रतिमा मंडपमध्यस्थवे
द्यामास्थितां तत्तद्दशांगेन तत्संहिताखिताऽपहत्ये निधाय दिशाकालौ संकीर्त्य यजमानाऽनुज्ञया वैष्णव
यागांतर्गतां श्रीनारायणपूजां करिष्ये॥ इति सं०॥ पूर्ववत्षोडशर्षिविमिकरादि मूर्त्तिन्यासं॥ ब्रास्मं

कुंडेष्वादिममेखलोन्नतिसमं विस्तारतुर्यांबुधैः खातं विस्तृतिसम्मितोच्चमथवा प्रोक्तं नगादिष्वपि ॥
हस्तव्यास २४ जिनीशकेन समतः सूर्यो १२ शकेनापि वार्कं तं कुंडबहिर्निवेश्य परितः स्वस्वाकृतिः सर्वतः ॥१॥
॥व्यासेन तु जिनां २४ शकेनैः समतयार्कं गाद्विर्मेखलास्तिस्रो वेद ४ गुणे ३ क्षणां २ शाविपुला निम्न्ययउद्दरा
मो३छ्रिता ॥ षड्६ ५ वाब्धि ४ गुणा ३ ॥२॥ श्रि विस्तृतियुतानंदां ९ शकोच्चादिमात्तत्पंचांशविद्भूतिमिता न्को
ध्यान्याश्चतस्त्रोमता ॥२॥ विस्तारेश्वरं शकाश्च कथिताश्चोच्चास्तथार्कांश १२ के नागा ८ ब्धि ४ क्रमशोपि वैक वि
मिनाषड्विहस्तरोच्चा बुधैः ॥ ष्या सान्तष्ठ ६ लवाष्ट ८ मांश विमितं रास्नाद्यं वा न वे चेवष्टदेष्टकाभिरपिव
नाम्रेण वा वेष्टयेत् ॥३॥

णोस्येति पंचभिः पंचांगन्यासं च स्वस्मिन् पूज्यप्रतिमायां च कृत्वा स्वात्मनि भगवत्पूजनं वा व्यास
नगतपीठपूजादि पुनः प्रदक्षिणां तं च पूर्ववत्कुर्यात् ॥ प्रदक्षिणाश्चतस्रः कार्याः ॥ एकां चंड्यां रवेः
सप्त तिस्रो दद्याद्विनायके ॥ चतस्रो विष्णवे दद्याच्छिवस्यार्धप्रदक्षिणा ॥१॥ इति संग्रहस्मृतेः ॥
जपसमर्पणानंतरं देवस्य दक्षिणे कुंडस्य स्थंडिलस्य वा संस्कारं कर्तुं प्राङ्मुख उपविश्य ॥ ॐ सहस्रशीर्षे
ति कुंडं स्थंडिलं वा स्पृष्ट्वा ततः समूह्यो पलेपनोल्लेखनांतं ॥ ॐ पुरुष एवेदं मिति मंत्रेण वाद्दना
दि विष्णुपूजा कार्या ॥ रक्तवर्णालंकृतायां मध्यमेखलायां ब्रह्मजज्ञानमिति ब्रह्मपूजा ॥ कृ
ष्णवर्णालंकृतायां कद्रुद्राये ति रुद्रपूजा ॥ योन्यां तु गौरीर्मिमाये ति गौरीपूजा ॥ ॐ एना वा नस्ये
त्यग्निं प्रतिष्ठाप्य ॥ त्रिपादूर्ध्व इनि समिंध्य ॥ देवस्योत्तरतो वेद्यंतरे ॥ यज्ञावाहनादि तं देशाने क
लशस्थापनं तं कुर्यात् ॥ ततः स्वगृह्योक्तविधिनाग्नौ चरुस्थापनांतं कुर्यात् ॥ तत्र चाज्यस्य
नशारवीनां तूष्णीं निर्वापप्रोक्षणे ॥ निरुप्तमाज्यं तस्माद्विरालित्यग्नावधिश्रित्य तेनैव पयसि च
रुं श्रपयित्वा ॥ हविरामादर्शनं ॥ यत्पुरुषेण मंत्रावृत्त्याऽऽसनं कल्पनं ध्यानं च कृत्वा ॥ अनुज्ञाप्यार्य
कुशोदकेन त्रोक्ष्य कुंडस्योपरिमेखलायां श्वेतवर्णालंकृतायामिदं विष्णुरिति ॥ ॐ

स्व ल

नपंचोपचारपूजनपूर्वकमादित्यादिदेवतासमिदादिहोमं पूर्वोक्तासमिद्धोमादिस्तोत्र
पाठं तं च कृत्वा बहिराज्यादिरक्षणं कुर्यात्॥ तां रात्रिं भगवत्कथामहोत्सवेनातिवाह्य॥ प्रा
तरहिस्यां कृतस्नानादिनित्यक्रियः॥ आचार्यर्त्विग्यजमानो स्वस्त्ययनपूर्वकमावाहनादि
षडंगन्यासांत पूजा जपौ विधाय निर्वापादि गृह्योक्तविधिना पायसं श्रपयित्वा॥ हविरासा
दनं कृत्वा॥ यत्पुरुषेणेत्यासनकल्पनध्यानं कृत्वा अनुज्ञां प्राप्य पंचोपचारैः पूजां कुर्यात् ॥८॥
॥ ततो यजमानः सहस्राहुतिपर्याप्तं पायसं जगद्बीजाय पुरुषाय न ममेति त्यजेत्॥ ततः ॥९॥
ऋत्विजः शतसंख्याः प्रत्येकं दशसंख्यया पायसाहुतीर्जुहुयुः॥ पंचाशत्संख्याकऋत्विज
श्चेत्प्रत्येकं विंशतिसंख्याहुतीर्जुहुयुः॥ ॐसहस्रशीर्षापुरुषः स० साध्याः संति देवाः॥ स्वा
हेति जपरहितहोमपक्षे॥ साध्याः संति देवा नारायणाय स्वाहेति सूक्तनाममंत्रयोः समु
च्चयः॥ त्यागः पूर्ववत्॥ ततो यजमानो लक्षाहुतिपर्याप्तमयुताहुतिपर्याप्तं वा पायसं
विश्वरूपाय नारायणायेति त्यजेत्॥ ततः ऋत्विजस्तद्दिने प्रज्ञाद्याहत्यानेकदिनेषु वा
र्ला॥

॥श्रीगणेशाय नमः॥ आचम्य प्राणानायम्य॥ यावद्धोमसमाप्ति प्रतिदिनमेवं होमा
द्यंतयोः पंचोपचारैर्देवता पूजयेत्॥ होमे समाप्ते अग्नये नम इति मंत्रेण नाममंत्रे
ण वा पंचोपचारैः स्वाहास्वधायुतं अग्निं संपूज्य॥ स्विष्टकृदादि प्रायश्चित्ताकृत्यं तं कृ
त्वा॥ बलिदानं कुर्यात्॥ तद्यथा॥ गर्ग इंद्र स्त्रिष्टुप्॥ इंद्रप्रीत्यर्थं बलिदाने विनियोगः
पूर्वे ॥त्रातारमिंद्र० त्विंद्रः॥ इंद्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय एष माष
भक्त बलिर्न मम॥ भो इंद्र दिशां रक्ष बलिं भक्ष मम सकुटुंबस्यायुः कर्ता क्षेमकर्ता शां ॥१॥
तिकर्ता पुष्टिकर्ता तुष्टिकर्ता ऋद्धिकर्ता वृद्धिकर्ता क्षेमकर्ता भव इति पुष्पाक्षतचंदन ॥२६॥
मुदकं च पूर्वं क्षिप्त्वा॥ ॥आग्नेये॥ हिरण्यस्तूपोऽग्निर्जगती अग्निप्रीत्यर्थं बलिदाने वि
नियोगः॥ त्वन्नो अग्ने० इति॥ अग्नये सांगाय० एष सदीप माषभक्त बलिर्न मम॥
भो अग्ने दिशां रक्ष सदीप बलिं भक्ष मम सकुटुंबस्यायुः कर्ता० भव॥ २॥ दक्षिणे॥ कु
शी यमो नुष्टुप् यमप्रीत्यर्थं बलिदाने वि०॥ यस्मिन्वृक्षे सु० इति॥ यमाय सां० एष सदीप
माष बलिर्न मम॥ भो यम दिशां रक्ष सदीप बलिं भक्ष मम सकुटुंबस्यायुः कर्ता०

निरृतिप्री० ब० ग०
क्षेमकर्ता भव त्वं सु० भव॥ सुबंधो निरृतिस्त्रिष्टुप्॥ प्रतायायुः प्र० इतां॥ निरृतये सां० माषभक्त
ब० र्न मम॥ भो निरृते इमं सदीपं मा० बलिं भक्ष मम सकुटुं० स्यायुः कर्ता क्षेम० शांति० पुष्टि० तुष्टि०
ऋद्धि० वृद्धि० भव भो निरृते त्वं सु० भव॥ पश्चिमे॥ शुनःशेपो वरुणस्त्रिष्टुप् व० प्री० ब० ग०॥
तत्त्वा० षी॥ वरुणाय सां० इमं सदी० र्न मम॥ भो वरुण इमं० भव॥ वायव्ये॥ वसिष्ठो वायुस्त्रि
ष्टुप् वायुप्री० बलि० ग०॥ आनो नियु० सदानः॥ वायवे सां० र्न मम॥ भो वायो इ० भव॥ उत्तरे॥
बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुः [illegible] सोमो गायत्री सो० प्री० ब० ग०॥ वयं सोम० मह्य॥ सोमाय
सां० बलिर्न मम॥ भो सोम० भव॥ ईशाने॥ गोतम ईशानो जगती ईशानप्री० ब० ग०॥ ईशाना
य०॥ भो ईशान० भव॥ ऊर्ध्वं प्रगाथ इंद्र स्त्रिष्टुप्॥ अस्मे रुद्रा० देवाः॥ ब्रह्मणे सां० ब० मम॥
ईशानपूर्वयोर्मध्ये ब्रह्मणे० भो ब्रह्मन् इ० भव॥ अधस्तात् अनंताय सां० न मम॥ भो अनंत इमं सदीपं ब० भव॥ ॥अथ
ग्रह बलिः॥ हिरण्यस्तूपः सविता त्रिष्टुप् श्रीसूर्यप्रीत्यर्थं बलिदाने विनियोगः॥ आकृष्णेन० श्यन्
आदित्याय सांगाय सपरिवाराय० ईश्वराग्निरूपाऽधिदेवताप्रत्यधिदेवतासहिताय इमं बलिं सम
र्पयामि॥१॥ आप्यायस्व गोतमः सोमो गायत्री सोमप्री० ब० ग०॥ आप्यायस्व० ये॥ उमा० भूपाधिदे०

पश्चिमनिरृतिमध्ये अनंत

आदंगो सार्पराज्ञ अनंतो गायत्री॥ अनंतप्री० ब० ग०॥
आयं गौः० स्व०॥ ९

प्रत्यधिदेवतासहिताय इदं० म० मि॥ २॥ विरूपो भौमो गायत्री भौमप्री० वि० गः॥ अग्निर्मूर्धा० न्वति॥
अंगारायसां० स्कंदभूमिरूपाय इदं बलिंस०॥ ३॥ उद्बुध्यध्वमिति बुधो बुधस्त्रिष्टुप् बुधप्री० वि०
गः॥ उद्बुध्यध्वं० वः॥ बुधायसां० नारायणविष्णुरूपायाधिदेवताप्रत्य० तासहिताय इदं० मि॥
॥ ४॥ बृहस्पते गृत्समदो बृहस्पतिस्त्रिष्टुप् बृ० प्री० वि० गः॥ बृहस्पते अति० चित्रं॥ बृहस्पतये सा०
ब्रह्मेंद्ररूपायाधि० ताय० इदं० मि॥ ५॥ शुक्रं ते नि भरद्वाज शुक्रस्त्रिष्टुप् शुक्रप्री० वि० गः॥
शुक्रं ते अ० रस्त्व॥ शुक्रायसां० इंद्रेंद्राणीरूपायाधि० प्रत्य० ताय इदं ब० स०॥ ६॥ शमग्निरि २७
ति शनिरुष्णिक् शनिप्री० वि० गः॥ शमग्निर० स्त्रिधः॥ शनैश्चरायसां० यमप्रजापतिरूपा ॥२॥
याधिदे० सहिताय इदं ब० स० मि॥ ७॥ कयानश्चित्रेति वामदेवो राहुर्गायत्री राहुप्री० वि० गः॥
कया० नश्चि० वृत्ता॥ राहवेसां० चित्रगुप्तब्रह्मरूपायाधि० प्र० ताय इदं ब० स०॥ ८॥ केतुं कृण्वन्निति गृत्समदो गणप
मधुच्छंदाः केतवो गायत्री केतुप्री० वि० गः॥ केतुं कृण्वन्न० था॥ केतुभ्यः सांगेभ्यः स० चित्रगुप्त तिर्जगती
ब्रह्मरूपेभ्यः इदं ब० स०॥ ९॥ ॥वेदकृत तरतः पंचभ्यः॥ गणानां त्वा गणपतये सां० (सिद्धिबुद्धिसहिताय) इदं ब० स०॥
ज्ञानवे इत्से० दुर्गायै सां०॥ वायोः शतं वायवे सां० आदित्य सू आकाशो गायत्री। आकाशाय॥ उपो० वा० अ

श्विभ्यां०॥ इदं द्रमित्रं०॥ गरुत्मते०॥ वास्तोष्पते०॥ वास्तोष्पतये सां० क्षेत्रस्य पतिना वामदेव०॥ क्षेत्र
पालाय० स्तृतवेन० मि॥ ॥ततः प्रज्वालितेऽग्नौ ग्रहणेन यजमानेन कृते वैश्वदेवयागस्य पूर्णतायै
पूर्णाहुतिं होष्ये॥ इति संकल्पे कृते आचार्यः स्रुचि द्वादशगृहीतमाज्यं गृहीत्वा॥ वस्त्रयु
तं चंदनादिविभूषितं नालिकेरफलं तत्र निधाय पत्न्या द्यन्वारब्धयजमानान्वारब्ध आ
चार्यस्तिष्ठन् कुर्यात्॥ समुद्रादूर्मिरिति त्रस्य वामदेवोग्निस्त्रिष्टुप्॥ पूर्णाहुतिहोमे विनियोगः॥
समुद्रादूर्मि० ऊर्मि॥ एवं स्वशाखोक्तपूर्णाहुतिमंत्रान्ते॥ पूर्णाहुतौ कृतायां॥ अग्निमीळेमधु
च्छंदा अग्निर्गायत्री॥ विष्णोर्नुकमिति षण्णां दीर्घतमा विष्णुस्त्रिष्टुप्॥
संवामष्टौ॥ परोमात्रया वर्ग॥ सहस्रशीर्षावर्गत्रय विष्णुर्योनिं तिस्रः नेजमेषेति स्रः॥ नमो ब्रह्मणे०॥
अग्ने पितरि निर्पंच दशानां गृत्समदो इंद्र त्रिष्टुप्॥ स्वादिष्ठयेति दशानां मधुच्छंदाः पवमानः सो
मो गायत्री॥ ॥मद्दो वैश्वानरस्माग्नौ विश्वानरऋषिः॥ वैश्वानरो देवता॥ त्रिष्टुप्छंदः वसोर्धारायां
विनियोगः॥ एवं स्वशाखोक्तमंत्रैर्वसोर्धारायां कृतायां॥ स्वशाखोक्तविधिना पूर्णपात्रविमोकादि तं
त्रशेषसमाप्तिं यद्वैव देवे शानदिक्कलशोदकेन सह वेदुंबरपल्लवैः सर्विगाचार्यत्रितुभ्यः प्राङ्मुखं
शुद्धश्वेतवस्त्राच्छादितासने उपविष्टमहूतवामभागोपविष्टाहूतवस्त्राच्छन्नपत्नीसहितयजमा

नंपुत्रादिपरिवारसहितमभिषिंचेत्॥ तत्रमंत्राः॥ समुद्रज्येष्ठा इति चतसृणां वसिष्ठ आपा त्रिष्टुप्
अभिषेके वि०॥ समुद्रज्येष्ठा०॥ एवं स्वशाखोक्तैर्वैदिकमंत्रैरभिषेके कृते पौराणमंत्रैरभिषिंचेत्
॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः॥ वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः॥१॥ प्र
द्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते॥ आखंडलोग्निर्भगवान् यमो वै निरृतिस्तथा॥२॥ वरु
णः पवनश्चैव धनाध्यक्षस्तथा शिवः॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा॥३॥ कीर्ति
र्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥ बुद्धिर्लज्जा वपुः शांतिः कांतिस्तुष्टिश्च मातरः॥४॥ एतास्त्वा
मभिषिंचंतु राकुकेश्च तर्पिताः॥ देवदानवगंधर्वयक्षराक्षसपन्नगाः॥५॥ ऋषयो मनवो गावो देव ॥ग्र०॥
मातर एव च॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥६॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहना २६
नि च॥ औषधानि च रत्नानि कालस्यावयवाश्च ये॥७॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः॥ ए
ते त्वामभिषिंचंतु सर्वकामार्थसिद्धये॥८॥ ॐ नमो यो राष्ट्रीमहे०ऋ०॥ अमुनाभिषिक्तो ऽस्तु॥ एवमभि
षिक्तः सपत्नीको यजमानः सर्वौषधीभिरनुलिप्तः सुस्नातः धृतशौक्लवासश्चंदनकुसुमविभूषि
तः विभूतिधारणं कृत्वा॥ भद्रासने प्राङ्मुख उपविश्य तद्दक्षुरवोपविष्टानामाचार्यादीनां गंधादि
नार्चनेभ्यो दक्षिणां दद्यात्॥ तद्यथा॥ प्रथमं गोदानं॥ यज्ञसाधनभूता या विश्वस्याघप्रणाशिना॥

विश्वरूपधरो देवः प्रीयतामनया गवा॥ कृतैतस्य यागपूर्णतायै इमां धेनुं सवत्सां यथाशक्ति
सोपस्करामाचार्याय तुभ्यमहं संप्रददे॥ न मम॥ प्रत्यक्षगोरसंभवेन तन्निष्क्रयं निष्कमितं वा
दद्यात्॥ एवं हिरण्यनिष्क्रयं वा ऽन्येभ्य ऋत्विग्भ्यो दद्यात्॥ तेपि यजमानशाखोचितमंत्रप्रति
ग्रहमंत्रैः प्रतिगृह्णीयुः॥ ततो गंधाद्युपचारैः प्रधानदेवतापीठदेवता मंडपपीठदेवतानां
चोत्तरपूजां कृत्वा ऽवाहनं न जानामीति संप्रार्थ्य प्रधानदेवतापीठदेवतासहितं प्रदक्षिणी
कृत्य नत्वा कल्लशोपरि मुकुलमुद्रां बद्ध्वा यथासूक्तं जपित्वा निवेद्य॥ एकाग्रचित्तो जितं
त इति संकीर्त्य यिंतित्यं उत्तिष्ठ ब्रह्मणस्प। त इति विसर्जनं कृत्वा॥ यांतु देवगणाः सर्वे इ
त्यनया देवताः प्रार्थ्य पीठद्वयदेवताप्रतिमाः सोपस्कराः आचार्यहस्ते प्रतिपाद्य॥ अ
ग्निसमीपमागत्य पर्युक्ष्य समाधाय॥ पूर्ववत्संभृत्य ॰भिः पंचोपचारैः संपूज्य॥ अग्नौ
भगवंतं ध्यात्वा जितं त इत्यादिना केवलैर्मंत्रैः नेन स्तोत्रेण स्तुत्वा॥ प्रदक्षिणं चतुष्ट
यमग्निष्ठ भगवतः कृत्वा नत्वा ललाटोपरि मुकुलमुद्रां बद्ध्वा यथाशक्ति सूक्तं जपि
त्वा॥ भगवते निवेद्य॥ जितं त इति संकीर्त्य॥ यांतु देवगणाः सर्वे इति॥ ॥विसृज्य॥

सूर्यमंडलस्थं भगवंतं ध्यात्वा प्रार्थयेत्॥ भगवन्देवदेवेश पुरुषोऽसि सनातन॥ कमलच्च पुंडरी
काक्ष न कस्यचिद्विशेषतः॥ ज्ञानादज्ञानतो वापि यन्न्यूनादिकृतं मया॥ तत्सर्वं पूर्णमेवा
स्तु त्वत्प्रसादाज्जनार्दन॥ ॥इति॥ ॥ततः शंखादिधारिणं सूर्यमंडलस्थं हृदये ध्यात्वा षो
डशभिः षोडशपुष्पाणि सूर्यमुद्दिश्य उक्षिप्य जितंत इति मंत्रेण तावंति पुष्पाणि स्वमू
र्ध्नि निधाय साष्टांगं प्रणम्य स्वस्मिन्नेव भगवंतं ह्रणं ध्यात्वा स्थापयेत्॥ ततो मंडपदेवता द्वारदे
वताश्च पंचोपचारैः पूजयित्वा॥ उत्तिष्ठ ब्रह्मणस्पत इति विसृज्य॥ ध्वजादि मंडपयुतमाचार्या
य प्रतिपाद्य॥ कृतस्य सग्रहमखं वैष्णवयागस्य परिपूर्णतायै यथोत्पन्नेनान्नेन यथाकालं ॥४॥ २९
सहस्रं ब्राह्मणान्भोजयिष्ये इति संकल्प्य अशक्तौ शतं ब्राह्मणान्भोजयिष्ये इति संकल्प्य॥
कृतस्य वैष्णवयागस्य परिपूर्णतायै नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां सर्गसंक
ल्पं च कृत्वा॥ वस्त्रदक्षिणादिना तोषितानां ब्राह्मणानामग्रे साष्टांगं प्रणम्य बद्धांजलिः प्रार्थये
त्॥ यन्मया कृतं विष्णुयागकर्म तन्मंत्रहीनं तंत्रहीनं देशकालहीनं श्रद्धाहीनं च भवद्वचनादि
त्ताः प्रसादात्परिपूर्णमस्तु॥ अच्छिद्रमस्त्विति॥ ते पि तथास्त्विति वदेयुः॥ ततोऽस्य स्यु
त्वाऽनेन विष्णुयागेन श्रीसूर्यमंडलांतर्वर्ती नारायणः प्रीयतामिति भगवदर्पणं कृत्वा दीनानाथांसंतोष

सुहृद्गोभ्योऽनुमानितो॥ इति वर्णत्रयाधिकारिको वैष्णवयागप्रयोगः॥ अथ चतुर्थाधि
कारिकस्तत्प्रयोगः॥ तत्र कामानवाप्नुयात्कामीति मुच्येतापन्न आपद इति सा
मान्योक्तेः शूद्रः सुखमवाप्नुयादिति॥ विशेषोक्तेश्च तत्फलप्रदो भावोऽस्ति तस्या
धिकारः॥ अतः क्वचिच्छुभदिने देशकालौ संकीर्त्य एतदनिष्टनिवृत्तिकामो विष्णु
सहस्रनामस्तोत्रस्य सहस्रसंख्यजपं ब्राह्मणैः कारयिष्ये इति संकल्प्य॥ जपका
न्वृणुयात्॥ यथाशक्ति वस्त्रगंधादिभिः संपूजयेच्च॥ ते च शुचयः कृतनित्य
क्रिया नारायणगतमानसाः॥ आस्तोत्रसमाप्तेर्वाग्यता कृत्यादिस्मरणपूर्वकं
नारायणं नमस्कृत्येत्यादि विध्यनुसारेण नारायणाय नम इत्येवं नमस्कारं वि
धाय॥ यावत्संख्यासमाप्ति जपेयुः॥ यावज्जपसमाप्ति स यजमानस्तु विज्ञोद
विधाशिनोऽधःशायी नो ब्रह्मचारिणो भवेयुः॥ तथादिस्मरणं चैवं कर्तव्यं य
स्य विष्णोः सहस्रनामस्तोत्रमंत्रस्य वेदव्यास भगवानृषिः॥ श्रीविश्वरूपनारा
यणो देवता अनुष्टुप्छंदः॥ इति॥ ततः शुक्लैकादश्यां कृतनित्यस्नानादियज

मानः सपत्नीको यजमानः देशकालौ संकीर्त्य कारीत जपसंपूर्णतायै शान्ताद्यं
सहस्रनामभि — र्होमं करिष्य इति संकल्प्य ॥ तदुक्तेन प्रकारेण नाममंत्रेण गणप
तिपूजनाद्यं आचार्यः स्थिरलग्ने तेभ्यो नाममंत्रेण द्वारदेवता मंडपदेवताः संपूज्य
नाममंत्रैरेव पताकाध्वजानामुद्धिल्य नाममंत्रैरेव धाप्यग्देवताप्रजनं सर्वं कृत्वा राय
यणं संपूज्य तद्दक्षिणतः कुंडे रामभिरेव मेखलायोनिदेवताः संपूज्य ॥ तत्तन्मंत्रैर्देव
तानामभिरेव नमोन्तैरग्निदेवतानादि बर्हिषि दुग्धतंदुलात्मकं विरामादनांतं तैः
र्नाममंत्रैरेव स्वाहान्तैरिध्माधानादिहिमाज्यभागांतं विधाय यद्द्रव्यमुपकल्पितं हविः श ॥३०॥
तावत्तसहस्रनामकरणकहोमात्मकं पयःप्रविम्यरूपिणा रायणायनम इति त्यागः कृत्वे
यथासंभवमेकेनाग्नानेकेन ब्राह्मणेन होमे समापिते स्विष्टकृदादि प्रायश्चित्तं होमांतं
बलिदानं च नाममंत्रैरेव विधाय ॥ नाममंत्रेण यथाचारं वा पूर्णाहुतिं हुत्वायो मुराद्ये
त्यादि पूर्वोक्तमंत्रैर्घृत्तेनोपविश्य सपरिवारं यजमानमभिषिंच्य सुस्नातं धूत श्वेत
वस्त्रं चंदनादि नाममंत्रेण विष्णुं निधारयी भूतिं धारयित्वा दक्षिणा दानेन तेन नामम
त्रेणैवोत्तरपूजां न सर्वप विसर्जनांते सूक्तं जपेत् वर्णं कृत्वा ॥ यत्तु देकं इत्येव गृह्य

ग्देवता अपि विसर्ज्य आचार्याय दक्षिणां प्रतिपादने कृते नाममंत्रेणाग्निं पंचोपचारैः सं
पूजित तं न इत्यादि स्तोत्रेण हास्तकृत्वा ॥ प्रदक्षिणादि स्तवनं पवर्गमंडपप्रतिपादनांतं कुर्या
त् ॥ षोडशाचे स्त्रिभि पुरुषायज्ञ गांहि जायन्म इति पुष्पोक्तं पूजनादि तु उक्त संख्या ब्रा
ह्मणेभ्यः ॥ सहस्रिणाहि द्विगुणमानादानि ॥ ततो भूयसीं दक्षिणां स्वर्गादि परमेश्वरांक
र्पणांतं पूर्ववत् ॥ इति चतुर्थवर्णाधिकोवैष्णवयागप्रयोगः ॥ इत्थं वैष्णवयागपद्ध
तिं विधाया नेन संदर्शिताः ॥ श्रीगोविंदपदारविंदमजने कासक्तियच्चेतसा ॥ साधूनां
परमां मुदं घटयितुं मन्ये इमेतावता श्रीमैत्रैंदकुमारस्वैतनपरो भूयासमस्यी ॥३१॥
तनौ ॥१॥ नीतैः स्वकीरणावीतैर्भास्वरस्त्रकां नभ्रस्ति रत्नकुर्वत ॥ नीजं नमस्तुंयथ र
नजयति सन्यादिमंडलेन सः ॥२॥ नानावैष्णवयज्ञानां मप्रमाणं निरूपणं ॥ प्रा
कारीत्यमनंतेन तेन तुष्यतु यज्ञभुक ॥ इति श्रीमहापदेवसुनानंतदेवविष्णु पा
कृते विष्णुयागपद्धतिः प्रयोगः समाप्तः ॥ ॥ यादृशं मितिदृष्टा यंनमे दोषः पचर ए
॥ ॥ कल्याणमस्तु ॥ ॥ संवत् १८७१ नापौषशुक्ल २ वारमं भद्रवासरे लिखितो
यं ग्रंथः लि० पंड्यारमाशीकरत्मज पंड्दीन मणीशंकरेण ॥ ॥शुभं भवतु॥ ॥

॥श्रीगणेशायनमः ॥अथविष्णुयागप्रयोगः सहस्रशीर्षादिविधौक्तः पुमानंजगज्जन्मवानि
बीजभूतः वेदैप्रणम्या